# ॐ आपदुद्धारक स्तोत्रम् *Āpaduddhāraka stotram*

*Rāmulu Gajavāḍa*

आपदामपहर्तारं दातारं सर्वसम्पदाम्

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

*āpadām-apahartāraṁ dātāraṁ sarva-sampadām*
*lokābhirāmaṁ śrīrāmaṁ bhūyo bhūyo namāmyaham .*

ॐ अस्य श्रीआपदुद्धारक श्रीरामचन्द्रस्तोत्र महामन्त्रस्य वसिष्ठ ऋषिः अनुष्टुप् छन्दः श्रीरामचन्द्रो देवता श्रींबीजं रां शक्तिः मं कीलकं  मम श्रीरामचन्द्र प्रसादसिध्यर्थे जपे विनियोगः ।

*oṁ asya śrīāpad-uddhāraka śrīrāma-candra-stotra mahā-mantrasya vasiṣṭha ṛṣiḥ anuṣṭup chandaḥ śrīrāmacandro devatā śrīṁbījaṁ rāṁ śaktiḥ maṁ kīlakaṁ  mama śrīṁrāmacandra prasāda-sidhyarthe jape viniyogaḥ* ।

**ध्यानम्** Dhyänam

आर्तनां आर्तिहन्तारं भीतानां भयनाशनम् ।

द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ।

*ārtanāam ārti-hantāraṁ bhītānāṁ bhaya-nāśanam*।
*dviṣatāṁ kāla-daṇḍaṁ taṁ rāmacandraṁ namāmyaham*।

नमः कोदण्डहस्ताय सन्धीकृतशराय च

दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥ १

*namaḥ kodaṇḍa-hastāya sandhīkṛta-śarāya ca*
*daṇḍita-akhila-daityāya rāmāya-āpannivāriṇe* | ***1***

आपन्न जनरक्षैकदीक्षायामित तेजसे

नमोऽस्तु विष्णवे तुभ्यं रामायापन्निवारिणे । ॥ आपदां ॥ २

*āpanna janarakṣaikadīkṣāyāmita tejase*|
*nmo'stu viṣṇave tubhyaṁ rāmāyāpannivāriṇe*||
|| *āpadāṁ* || ***2***

पदाम्भोजरजः स्पर्श पवित्रमुनियोषिते ।

नमोऽस्तु सीतापतये रामायापन्निवारिणे ॥ ॥ आपदां ॥ ३

*padāmbhoja-rajaḥ sparśa pavitra-muni-yoṣite*|
*namo'stu sītā-pataye rāmāyā-pannivāriṇe* ||
|| *āpadāṁ* || ***3***

दानवेन्द्र महामत्तगज पञ्चास्यरूपिणे

नमोऽस्तु रघुनाथाय रामायापन्निवारिणे ॥ ॥ आपदां ॥ ४

*dānavendra mahā-matta-gaja pañcāsya-rūpiṇe*
*namo'stu raghu-nāthāya rāmāyā-pannivāriṇe* ||
|| *āpadāṁ* || ***4***

महीजाकुचसंलग्न कुङ्कुमारुणवक्षसे

नमः कल्याणरूपाय रामायापन्निवारिणे । ॥आपदां ॥ ५

*mahījākucasaṁlagna kuṅkumāruṇavakṣase*
*namaḥ kalyāṇarūpāya rāmāyāpannivāriṇe*|
||*āpadāṁ*|| ***5***

पद्मसम्भवभूतेश मुनिसंस्तुतकीर्तये

नमो मार्ताण्डवंश्याय रामायापन्निवारिणे । ॥आपदां ॥ ६

*padma-sambhava-bhūteśa muni-saṁstuta-kīrtaye*
*namo mārtāṇḍa-vaṁśyāya rāmāyā'pannivāriṇe|*
*||āpadāṁ|| 6*

हरत्यार्तिं च लोकानां यो वा मधुनिषूदनः

नमोऽस्तु हरये तुभ्यं रामायापन्निवारिणे ॥ ॥आपदां ॥ ७

*haratyārtiṁ ca lokānāṁ yo vā madhu-niṣūdanaḥ*
*namo'stu haraye tubhyaṁ rāmāyā-pannivāriṇe||*
*||āpadāṁ||* ***7***

तापकारणसंसार गजसिंहस्वरूपिणे

नमो वेदान्तवेद्याय रामायापन्निवारिणे । ॥आपदां ॥ ८

*tāpakāraṇa-saṁsāra gaja-siṁha-svarūpiṇe*
*namo vedānta-vedyāya rāmāyā'pannivāriṇe|*
*||āpadāṁ||* ***8***

रङ्गत्तरङ्ग जलधि गर्वहृच्छरधारिणे

नमः प्रतापरूपाय रामायापन्निवारिणे । ॥आपदां ॥ ९

*raṅga-ttaraṅga jaladhi garva-hṛ-cchara-dhāriṇe*

*namaḥ pratāpa-rūpāya rāmāyā'pannivāriṇe // āpadāṁ //* ***9***

दारोपहित चन्द्रावतंस ध्यातस्वमूर्तये

नमः सत्यस्वरूपाय रामायापन्निवारिणे । ॥आपदां ॥ १०

*dāropahita candrāvataṁsa dhyāta-svamūrtaye*
*namaḥ satyasvarūpāya rāmāyā-pannivāriṇe|*

*// āpadāṁ //* ***10***

तारानायकसङ्काशवदनाय महौजसे

नमोऽस्तु ताटका-हन्त्रे रामायापन्निवारिणे । ॥आपदां ॥ ११

*tārā-nāyaka-saṅkāśa-vadanāya mahaujase*
*namo'stu tāṭakā-hantre rāmāyā-pannivāriṇe* |
||*āpadāṁ* || ***11***

रम्यसानुलसच्चित्रकूटाश्रम विहारिणे

नमस्सौमित्रिसेव्याय रामायापन्निवारिणे ॥ ॥ आपदां ॥ १२

ramyasānu-lasaccitrakūṭāśrama vihāriṇe
namas-saumitri-sevyāya rāmāyā-pannivāriṇe||

॥ āpadāṁ ॥ **12**

सर्वदेवाहितासक्त दशाननविनाशिने

नमोऽस्तु दुःखध्वंसाय रामायापन्निवारिणे ॥ ॥आपदां ॥ १३

*sarvadevā-hitāsakta daśānana-vināśine*

*namo'stu duḥkha-dhvaṁsāya rāmāyā-pannivāriṇe* //

// *āpadāṁ* // ***13***

रत्न सानुनिवासैक वन्द्यपादाम्बुजाय च ॥

नमस्त्रैलोक्यनाथाय रामायापन्निवारिणे ॥ ॥आपदां ॥ १४

*ratna sānu-nivāsaika vandyapādāmbujāya ca* |
*namastrailokyanāthāya rāmāyāpannivāriṇe*||

// *āpadāṁ* // ***14***

संसारबन्ध मोक्षैकहेतु दामप्रकाशिने.

नमः कलुषसंहर्त्रे रामयापन्निवारिणे ॥ ॥आपदां ॥ १५

*saṁsāra-bandha mokṣaika-hetu dāma-prakāśine,*
*namaḥ kaluṣa-saṁhartre rāmayā-pannivāriṇe*||

// *āpadāṁ* // ***15***

पवनाशुग संक्षिप्त मारीचादिसुरारये

नमो मखपरित्रात्रे रमायापन्निवारिणे ॥  ॥ आपदां ॥ १६

*pavanāśuga saṅkṣipta mārīcādisurāraye*
*namo makhaparitrātre ramāyāpannivāriṇe||*
*|| āpadāṁ||* ***16***

दाम्भिकेतर भक्तौघ महानन्द प्रदायिने

नमः कमलनेत्राय रमायापन्निवारिणे ॥  ॥ अपदां ॥ १७

*dāmbhi-ketara bhaktaugha mahānanda pradāyine*
*namaḥ kamala-netrāya ramāyā-pannivāriṇe||* **||** *āpadāṁ* **||** ***17***

लोकत्रयोद्वेगकर कुम्भकर्णशिरश्छिदे

नमः नीरददेहाय रामायापन्निवारिणे ॥  ॥ आपदां ॥  १८

lokatray-odvegakara kumbhakarṇa-śira-śchide
namaḥ nīrada-dehāya rāmāyā-pannivāriṇe ||
|| āpadāṁ|| **18**

काकासुरैकनयन हरल्लीलास्त्रधारिणे

नमो भक्तैकवेद्याय रामायापन्निवारिणे ॥  ॥ आपदां ॥  १९

*kākāsuraika-nayana harallīlāstradhāriṇe*
*namo bhaktaika-vedyāya rāmāyāpannivāriṇe||*
*|| āpadāṁ||* ***19***

भिक्षुरूप समाक्रान्त बलिसर्वैकसम्पदे

नमो वामनरूपाय रामायापन्निवारिणे ॥  ॥ आपदां ॥ २०

*bhikṣurūpa samākrānta bali-sarvaika-sampade*
*namo vāmana-rūpāya rāmāy-āpannivāriṇe||*

*// āpadāṁ //* ***20***

राजीवनेत्र सुस्पन्द रुचिराङ्गसुरोचिषे

नमः कैवल्यनिधये रामायापन्निवारिणे ॥ ॥ आपदां ॥ २१

*rājīvanetra suspanda rucirāṅgasurociṣe*
*namaḥ kaivalyanidhaye rāmāyāpannivāriṇe||*
*|| āpadāṁ||* ***21***

मन्दमारुत संवीत मन्दारद्रुमवासिने

नमः पल्लवपादाय रामायापन्निवारिणे ॥ ॥आपदं ॥ २२

*manda-māruta saṁvīta mandāra-druma-vāsine*
*namaḥ pallava-pādāya rāmāyā-pannivāriṇe ||*
*|| āpadaṁ|| 22*

श्रीकण्ठचापदलन धुरीण बलबाहवे ।

नमः सीतानुषक्ताय रामायापन्निवारिणे ॥ ॥ आपदां ॥ २३

*śrī-kaṇṭha-cāpadalana dhurīṇa balabāhave|*
*namaḥ sītānuṣaktāya rāmāyā-pannivāriṇe||*
*|| āpadāṁ|| 23*

राजराजसुहृद्योषार्चित मङ्गलमूर्तये ।

नमः इक्ष्वाकुवंश्याय रामायापन्निवारिणे ॥ ॥ आपदां ॥ २४

*rājarājasuhṛdyoṣārcita maṅgalamūrtaye|*
*namaḥ ikṣvākuvaṁśyāya rāmāyā-pannivāriṇe||*
*|| āpadāṁ||* ***24***

मञ्जुलादर्श विप्रेक्षणोत्सुकैक विलासिने ।

नमः पालितभक्ताय रामायापन्निवारिणे ॥ ॥ आपदां ॥ २५

*mañjulā-darśa viprekṣaṇotsukaika vilāsine|*
*namaḥ pālitabhaktāya rāmāyā-pannivāriṇe||*
*āpadāṁ||* ***25***

भूरिभूधर कोदण्डमूर्ति ध्येयस्वरूपिणे ।

नमोऽस्तु तेजोनिधये रामायापन्निवारिणे ॥ आपदां ॥ २६

*bhūri-bhūdhara kodaṇḍa-mūrti dhyeya-svarūpiṇe|*
*namo'stu tejonidhaye rāmāyā-pannivāriṇe||*
*|| āpadāṁ||* ***26***

योगीन्द्रहृत्सरोजात मधुपाय महात्मने ।

नमो राजाधिराजाय रामायापन्निवारिणे ॥ ॥ आपदां ॥ २७

*yogīndra-hṛt-sarojāta madhupāya mahātmane|*
*namo rājādhi-rājāya rāmāyā-pannivāriṇe||*
*||āpadāṁ||* ***27***

भूवराहस्वरूपाय नमो भूरिप्रदायिने ।

नमो हिरण्यगर्भाय रामायापन्निवारिणे । २८

*bhūvarāhasvarūpāya namo bhūripradāyine|*
*namo hiraṇyagarbhāya āmāyāpannivāriṇe|*
*||āpadāṁ||* ***28***

योषाञ्जलिविनुर्मुक्तलाजाञ्जित वपुष्मते ।

नम स्सौन्दर्यनिधये रामायापन्निवारिणे ॥ २९ ॥

*yoṣāñjalivinurmuktalājaañjiata vapuṣpmate|*
*nama ssaundaryanidhaye rāmāyāpannivāriṇe||*
*||āpadāṁ||* ***29***

नखकोटि विनिर्भिन्न दैत्याधिपति वक्षसे ।

नमो नृसिंहरूपाय रामायापन्निवारिणे ॥ ३०

*nakhakoṭi vinirbhinna daityādhipati vakṣase|*
*namo nṛsiṁharūpāya rāmāyāpannivāriṇe ||*
*||āpadāṁ||* ***30***

मायामानुषदेहाय वेदोद्धरण हेतवे ।

नमोऽस्तु मत्स्यरूपाय रामयापन्निवारिणे ॥ ॥ आपदां ॥ ३१

māyāmānuṣadehāya vedoddharaṇa hetave|
namo'stu matsyarūpāya rāmayāpannivāriṇe||
|| *āpadāṁ*|| ***31***

मितिशून्यमहादिव्यमहिम्ने मानितात्मने ।

नमो ब्रह्मस्वरूपाय रामायापन्निवारिणे ॥ ॥ आपदां ॥ ३२

*mitiśūnyamahādivyamahimne mānitātmane|*
*namo brahmasvarūpāya rāmāyāpannivāriṇe||*
|| *āpadāṁ*|| ***32***

अहङ्कारेतरजनस्वान्त सौधविहारिणे ।

नमोऽस्तु चित्स्वरूपाय रामायापन्निवरिणे ॥ ॥ आपदां ॥ ३३

ahaṅkāretarajanasvānta saudhavihāriṇe|
namo'stu citsvarūpāya rāmāyāpannivariṇe||
|| āpadāṁ|| 33

सीतालक्ष्मणसंशोभिपार्श्वाय परमात्मने ।

नमः पट्टाभिषिक्ताय रमायापन्निवारिणे ॥ ॥ आपदां ॥ ३४

*sītālakṣmaṇasaṁśobhipārśvāya paramātmane|*
*namaḥ paṭṭābhiṣiktāya ramāyāpannivāriṇe||*
*// āpadāṁ //* ***34***

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

*āpadāmapahartāraṁ dātāraṁ sarvasampadām|*
*lokābhirāmaṁ śrīrāmaṁ bhūyo bhūyo namāaham|*

सन्नद्दः कवची खड्गी चापभाणधरो युवा।

तिष्ठन् ममाग्रतो नित्यं रामः पातु सललक्ष्मणः॥

*sannaddaḥ kavacī khaḍgī cāpabhāṇadharo yuvā |*
*tiṣṭhan mamāgrato nityaṁ rāmaḥ pātu salakṣmaṇaḥ ||*

## फलश्रुति phalaśruti

इमं स्तवं भगवतः पठेद्यः प्रीतमानसः।

प्रभाते वा प्रदोषे वा रामस्य परमात्मनः॥ १

*imaṁ stavaṁ bhagavataḥ paṭhedyaḥ prītamānasaḥ|*
*prabhāte vā pradoṣe vā rāmasya paramātmanaḥ|| **1***

स तु तीर्त्वा भवाम्भोधि मापदः सकला अपि

रामासायुज्य माप्नोति देवदेव प्रसादतः॥ २

*sa tu tīrtvā bhavāmbhodhi māpadaḥ sakalā api*
*rāmāsāyujya māpnoti devadeva prasādataḥ|| 2*

कारागृहादि बाधासु सम्प्राप्ते बहुसङ्कटे।

आपन्निवारकस्तोत्रं पठेद्यस्तु यथाविधि॥ ३

*kārāgṛhādi bādhāsu samprāpte bahusaṅkaṭe|*
*āpannivārakastotraṁ paṭhedyastu yathāvidhi|| 3*

संयोज्यानुष्टुभ्यं मन्त्रमनुश्लोकं स्मरन् विभुम्।

सप्ताहा त्सर्वबादेभ्यो मुच्यते नाऽत्र संशयः॥ ४

*saṁyojya-anuṣṭubhyaṁ mantram-anuślokaṁ smaran vibhum|*
*saptāhāt-sarva-bādebhyo mucyate nā'tra saṁśayaḥ|| 4*

द्वात्रिंशद्वारजपतः प्रत्यहं तु दृढव्रतः।

वैशाखे भानु मालोक्य  प्रत्यहं शतसङ्ख्या॥ ५

***dvātriṁśad-vāra-japataḥ pratyahaṁ tu dṛḍhavrataḥ |***
***vaiśākhe bhānu mālokya  pratyahaṁ śata saṅkhyā|| 5***

धनवान् धनदप्रख्यः स भवे न्नात्र संशयः।

बहुनात्र किमुक्तेन यं यं कमयते नरः॥ ६

*dhanavān dhanadaprakhyaḥ sa bhave nnātra saṁśayaḥ|*
*bahunātra kimuktena yaṁ yaṁ kamayate naraḥ||* ***6***

तं तं काम माप्नोति स्तोत्रेणानेन मानवः।

यंत्रपूजाविधानेन जपहोमादितर्पणैः॥ ७

*taṁ taṁ kāma māpnoti stotreṇānena mānavaḥ|*
*yaṁtrapūjāvidhānena japahomāditarpaṇaiḥ||* ***7***

यस्तु कुर्वीत सहसा सर्वान् कामा-नवाप्नुयात्

इह लोके सुखी भूत्वा परे मुक्तो भविष्यति। ८

*yastu kurvīta sahasā sarvān kāmā navāpnuyāt*
*iha loke sukhī bhūtvā pare mukto bhaviṣyati|  8*

**इत्यगस्त्यसंहितायां उमामहेश्वरसंवादे आपदुधारकस्तोत्रपटलं नामैकत्रिंशतोध्यायः**

*ityagastyasaṁhitāyām umāmaheśvarasaṁvāde āpadudhārakastotrapaṭalaṁ nāmaikatriṁśatodhyāyaḥ*

**जै श्रीमन्नारायण** jai śrīmannārāyaṇa